**विपक्व** *a.* 1 Fully ripened or matured. -2 Developed, fulfilled; यच्च तप्तं तपस्तस्य विपक्वं फलमद्य नः Ku. 6. 6. -3 Cooked. -4 Thoroughly burnt, destroyed. -5 Not burnt.

**विपञ्चिका, -विपञ्ची** 1 A lute. -2 Play, sport, pastime.

**विपट्** 10 U. 1 To tear up or out; (केतकबर्हं) विपाटयामास युवा नखाग्रैः R. 6. 17. -2 To pull or draw out, extract. -3 To root up, eradicate. -4 To open, unfold.

**विपाटः** A kind of arrow; परितोऽरोधि विपाटपञ्जरेण Śi. 20. 17. See विपाठ.

**विपाटनम्** 1 Tearing open, splitting. -2 Eradication. -3 Spoliation. -4 Acute pain.

**विपाटित** *p. p.* Split asunder, uprooted; दन्तैर्नखाग्रैश्च विपाटितानि Bv. 1. 85.

**विपण्** 1 Ā. 1 To sell, barter; आभीरदेशे किल चन्द्रकान्तं त्रिभिर्वराटैर्विपणन्ति गोपाः Subhāṣ. -2 To bet, stake.

**विपणः, -विपणनम्** 1 Sale; विपणेन च जीवन्तो वर्ज्याः स्युर्हव्यकव्ययोः Ms. 3. 152. -2 Petty trade. -3 Petty market; विपणापणवान् रम्यो भक्ष्यभोज्यविहारवान् Mb. 14. 59. 11. -4 Engaging, undertaking; अर्थेन तु समोऽनर्थो यत्र लभ्येत नोदयः। न तत्र विपणः कार्यः खरकण्डूयनं हि तत्॥ Mb. 3. 33. 66.

**विपणिः, -णी** *f.* 1 A market, market-place, stall; हा हा नश्यति मन्मथस्य विपणिः सौभाग्यपण्याकरः Mk. 8. 38; Śi. 5. 24; R. 16. 41. -2 An article or commodity for sale. -3 Trade, traffic; Ms. 10. 116. **-Comp. -गत** *a.* being on the market. **-जीविका** subsistence by traffic. **-पथः** a shop-street.

**विपणिन्** *m.* A trader, merchant, shop-keeper; (पण्य) पूर्णापणा विपणिनो विपणीर्विभेजुः Śi. 5. 24.

**विपण्यु** *a.* 1 One who has left occupation, practice etc. -2 Indifferent; विरजधियोऽन्वयन्त्यभिविपण्यव एकसरम् Bhāg. 10. 87. 19.

**विपथः** A wrong road, bad way (lit. and fig.); सत्पथं कथमुत्सृज्य यास्यामि विपथं पथः Mb. 12. 359. 11.

**विपद्** 4 Ā. 1 To go badly; fail, miscarry (as a business &c.). -2 To fall into misfortune or bad state; स बन्धुर्यो विपन्नानामापदुद्धरणक्षमः H. 1. 29. -3 To be disabled or incapacitated. -4 To die, perish; नाथवन्तस्त्वया लोकास्त्वमनाथा विपत्स्यसे U. 1. 44; हा तात एष ते नरेन्द्रचित्ताराधनोपकरणं जनो विपद्यते Māl. 5; Mk. 1. 38. -5 To obstruct. -6 To come to naught; यदि त्वभिहितं राज्ञा त्वयि तन्न विपत्स्यते Rām. 2. 18. 26. *-Caus.* To destroy, kill.

**विपत्तिः** *f.* 1 A calamity, misfortune, disaster, mishap, adversity; संपत्तौ च विपत्तौ च महतामेकरूपता Subhāṣ. -2 Death, destruction; अतिरभसकृतानां कर्मणामाविपत्तेर्भवति हृदयदाही शल्यतुल्यो विपाकः Bh. 2. 99; R. 19. 56; Ve. 4. 6; हिमसेकविपत्तिः नलिनी R. 8. 45. -3 Agony, torment (यातना). -4 Cessation, end. **-त्तिः** (*m.*) An excellent or distinguished footsoldier; स्यन्दना नो च तुरगाः सुरेभा वा विपत्तयः Ki. 15. 16. **-Comp. -कालः** season of adversity.

**विपद्** *f.* 1 A calamity, misfortune, adversity, distress; तत्त्वनिकषग्रावा तु तेषां (मित्राणां) विपद् H. 1. 183. -2 Death; सिंहादवापाद्विपदं नृसिंहः R. 18. 35. **-Comp. -उद्धरणम्, -उद्धारः** relieving or extricating (one) from misfortune. **-कालः** times of need, season of calamity, adversity. **-ग्रस्त, -युक्त** *a.* overtaken by or involved in calamity, unhappy, unfortunate. **-सागरः** 'sea of misery', a very heavy calamity or disaster.

**विपदा** See विपद्.

**विपन्न** *p. p.* 1 Dead. -2 Lost, destroyed. -3 Unfortunate, afflicted, distressed, fallen into adversity. -4 Declined. -5 Disabled, incapacitated; बलिं विपन्नमादाय अस्तं गिरिमुपागमन् Bhāg. 8. 12. 46. **-न्नः** A snake. **-Comp. -दीधिति** *a.* one whose splendour is gone. **-देह** *a.* dead, defunct; विपन्नदेहे मयि मन्दभाग्ये ममेति चिन्ता क्व गमिष्यसि त्वम् Mk. 1. 38.

**विपरिक्रान्त** *a.* Courageous, powerful.

**विपरिगा** 3 P. To go over, be upset (as a cart).

**विपरिणम्** *-Caus.* To change or transform into. *-Pass.* 1 To be changed into. -2 To undergo a change for the worse.

**विपरिणमनम्, विपरिणामः** 1 A change, an alteration. -2 Change of form, transformation. -3 One of the modes of construing a sentence according to which a word or expression in the sentence is changed so as to suit the general trend in the context. This change may pertain to विभक्ति, लिङ्ग, वचन, पुरुष, काल, अर्थ etc.; ŚB. on MS. 1. 2. 1.

**विपरिमर्शः** Consideration; प्रकृतीनां सामवायित-विपरिमर्शः Kau. A. 3, 11.

**विपरिवृत्** 1 Ā. 1 To turn round, revolve (fig. also); हेतुनानेन कौन्तेय जगद्विपरिवर्तते Bg. 9. 10. -2 To roll about; भूमौ विपरिवर्तेत Ms. 6. 22. -3 To wander about, move to and fro. -4 To return. -5 To surround; attend upon (with acc.); दुःखं सुतेन सततं जनान् विपरिवर्तते Mb. 12. 139. 64.

**विपरिवर्तनम्** Turning about, rolling. **-Comp. -विद्या** a magical formula for causing a person to return; Ks.

**विपरिश्रमता** The state of being without fatigue; उरु सत्त्वमाह विपरिश्रमता Ki. 6. 35.

**विपरी** [विपरि + इ] 2 P. 1 To turn in an opposite direction. -2 To be otherwise, fail, prove fruitless; कल्याणं विदधातु वा भगवतीनीतिर्विपर्येतु वा Māl. 6. 3. -3 To change for the worse. -4 To go round, return.